(*on* ix. 2. 13); MayūMāli. 825. 18 (*on* xi. 3. 11); **1 B** greasing etc. (at the nave of a wheel) तत्रावयवो यश्चक्रस्य नाभिसंज्ञकः सोऽञ्जनादिगुणयुक्तनाभिसंज्ञावयवप्रकृतिः Pradī. iv. 244B. 8 (*on* v. 1. 2); **2 A** magic collyrium etc. अनेनैव विधानेन अञ्जनादीनि साधयेत् JayāS. 26. 66; तेषां दृश्यद्रष्टॄणामञ्जनादिसिद्धानाम् ··· यद्दर्शनमिन्द्रियाधीनानुभवस्तत्प्रत्यक्षमेव NyāyKa. 259. 7; अन्तर्धानं चाञ्जनादिना मनुजादीनामिव तेषाम् ··· उपपद्यते Bhām. 234. 2 (*on* i. 3. 27); निधिदर्शनादिहेतोरञ्जनादेरप्यस्वाभाविकतया दोषत्वप्रसङ्गात् S'atDū. 178. 12; Upask. 415. 4 (*on* ix. 2. 13); **2 B** collyrium etc. कथं पुनरक्षं प्रतिगतं ज्ञानमिष्यते न संयोगित्वेन अञ्जनादेः प्रत्यक्षप्रसङ्गात् NyāyMañ. i. 85. 28; SiddhYo. 20. 21; अञ्जनादिवच्चक्षुरुपकारित्वेन चाभ्युपगमात् PramāMi. i. 19. 27 (*on* i. 1. 25); TattvMu. 5. 24; Vādā. 27. 3; अञ्जनादेः चक्षुःसंस्कार इव स्वान्तसंस्कारे भगवद्भजनस्योपयोगात् VīraMi. (Bhakti.) 8. 7; **2 C** application of collyrium or unguent etc. एवकारमञ्जनादिप्रतिषेधे व्याचक्षते। न केवलं स्त्रीक्षीरं भक्षणे वर्ज्यं किं तर्ह्यन्यास्वप्येवंविधासु क्रियासु ManuBh i. 423. 9 (*on* 5. 9); अञ्जनादिफलश्रुतिवदित्यनुमानम् VedāntKa. 479. 11 (*on* iii. 4. 1); S'ārṅgaPa. 2907; तदभावे त्वन्यत्राञ्जनादि समर्थयत् किंचिद्द्रव्यापादानमेव Mīmā-Kau. i. 58. 4 (*on* i. 3. 9); Hastyāyur. 27. 2 (1. 2); **3** (Gr.) (*gaṇa*) beginning with the word Añjana वनगिर्योः कोटराञ्जनादीनाम् CāndraVyā. v. 2. 132; कोटराञ्जनादीनां वनगिरौ S'ākaṭāVyā. ii. 2. 95; अञ्जनादीनां गिरौ SiddhaHe. iii. 2. 77; GaṇRa. 2. 142 (178): **4** (a class of medicinal plants) beginning with *Añjanā* पित्तजे ज्वरे। अञ्जनादिः सकाश्मर्यः सारिवादिः सशर्करः AṣṭāSam. ii. 4. 25 (4. 1); **5** (mountains) Añjana etc. पर्वतेष्वञ्जनादिषु शाश्वतार्हत्प्रतिमाष्टाह्निकां शक्रादयो दधुः TriṣaS'aPuC. ii. 3. 277; ii. 3. 839.

**अञ्जनादि** (añjanādi) *adv.* from anointing onwards अञ्जनादि यूपं यजमानो नोत्सृजत्या परिव्ययणात् ĀpaS'S. vii. 10. 5; ĀśvaS'S. I. vi. 14. 11.

**अञ्जनादिक** (añjanādi-ka) *adj.* **1** jet (a black gemlike substance) etc. वज्रेन्द्रनीलवैडूर्यपद्मरागाञ्जनादिकम्। ··· रत्नौघमुपार्जयत् PārśvC. 7. 788; **2** applying ointment etc. अञ्जनादिकं वा। दुःस्वप्नं हरति ĪśānS'iPa. i. 23. 36; योगमानेन यः कुर्यात्परिषेकाञ्जनादिकम्। ··· वैद्यः स श्रो(स्रो)तोन्धं निवर्तयेत् Hastyāyur. 147. 5 (1. 18); **3** collyrium etc. अञ्जस्वेत्यादिभिरेव मन्त्रैरञ्जनादिकं ददातीत्याहुः VīraMi. (Saṁskāra) 937. 8.

**अञ्जनादिकसत्सिद्धि** (añjanādika-satsiddhi) *f.* perfect preparation of magic collyrium etc. अत्रैव नगरे ··· विद्युच्चौरोऽभवत्तदा। अञ्जनादिकसत्सिद्धिगुटिकासिद्धिकोविदः BṛKathāK. 10. 4.

**अञ्जनादिकाण्ड** (añjanādi-kāṇḍa) *n.* part of sacrificial rites beginning with the anointing (of the sacrificial post) यजमानस्य यूपत्यागनिषेधोऽञ्जनादिकाण्डस्यानुसमये सत्युपपद्यते NyāyMāVi. 281. 10 (*on* v. 2. 5)

**अञ्जनादिकालीन** (añjanādikāl-īna) *adj.* connected with the time of anointing etc. तदिदमुच्छ्रयणाञ्जनादिकालीने वैदिकस्पर्शे भवति NyāyMāVi. 456. 8 (*on* ix. 3. 3)

**अञ्जनादिजन्य** (añjanādi-janya) *adj.* to be produced by anointing etc. तदपि (यूपत्वम्) दीक्षाकालकर्तव्यकतिपयच्छेदनादिधर्मजन्यमेव न त्वञ्जनादिजन्यमपि BhāṭṭDī. iii. 198. 6 (*on* x. 1. 5)

**अञ्जनादिदान** (añjanādi-dāna) *n.* giving or offering of collyrium etc. तस्माददृष्टार्थमञ्जनादिदानम् ManuBh. i. 303. 3 (*on* 3. 210)

**अञ्जनादिसंस्कार** (añjanādi-saṁskāra) *m.* amelioration through anointing etc. अञ्जनादिसंस्कारेषु ··· फलश्रवणमर्थवादः S'ivārkaMaDī. ii. 385. 13 (*on* iii. 4. 2); MayūMāli. 825. 17 (*on* xi. 3. 11)

**अञ्जनादिसंस्कृत** (añjanādi-saṁskṛta) *adj.* ameliorated by the use of collyrium etc. न ह्यत्राञ्जनादिसंस्कृतेन पितुः किंचित्प्रयोजनमस्ति ManuBh. i. 303. 2 (*on* 3. 210); यथाञ्जनादिसंस्कृतं चक्षुः सातिशयं भवति PramāMī. 36. 7 (*on* i. 2. 4); NyāySiA. 195. 5.

**अञ्जनाद्यपवर्ग** (añjanādy-apavarga) *m.* end of (the amelioration through) anointing etc. अञ्जनादेर्हि न यूपगतातिशयो द्वारं किं तु यूपस्वरूपमेव तच्च यूपापकर्षविधानात्पशुत्रयस्याप्येक इति पशुत्रयापवर्गेऽञ्जनाद्यपवर्गः MayūMāli. 825. 19 (*on* xi. 3. 11)

**अञ्जनाद्युपयोग** (añjanādy-upayoga) *m.* use of collyrium etc. अञ्जनाद्युपयोगोऽपि दोषनिर्हरणायैव न गुणजन्मने NyāyMañ. i. 148. 12.

**अञ्जनाद्रि** (añjanādri) *m.* **A** mountain or heap of collyrium महामहिषसंस्थं तमञ्जनाद्रिसमप्रभम् ··· स्मरेद्देवमपीश्वरम् PauṣkS. 4. 151; अञ्जनाद्रिप्रकाशोऽपि स जिनो देहतेजसा। जिगाय तिग्मगुम् PadmP.(Ra.) 21. 25; 71. 19; 74. 39; अञ्जनाद्रिप्रतीकाशं शिखामन्त्रं तथाकृतिम् PāraS. 6. 252; 11. 94; BṛNāraP. 29. 47; अञ्जनाद्रिसमानेषु महिषेषु कलस्वनाः। गुरुरारोपयामास पुमांसो गोणिकास्तकाः BṛKathāK. 11. 79; TilaMañ. 426. 21; LiṅgaP. i. 97. 39; सः (सूकरः) ··· अञ्जनाद्रिरिव श्यामः GaṇeP. ii. 106. 6; SaurP. 37. 9; AdhyāRā. v. 4. 4; चिन्तयेत् ···प्रद्युम्नम् ··· अञ्जनाद्रिप्रतीकाशम् LakṣmīT. 10. 37; EI. iii. 75. 6; MalliC. 1. 84; **B** name of a mountain, the Añjana mountain काश्चित् (नार्यः) अञ्जनाद्रिसमासक्तसंध्यारेखाद्युतिं दधुः PadmP.(Ra.) 77. 18; वक्त्राणि ··· शृङ्गाणीवाञ्जनाद्रेर्दवदहनशिखादीपितानीव रात्रौ ··· (दशग्रीव) दिक्षु क्षिपामि ĀścaCū. 4. 11; RāghPāṇ. (Dha.) 18. 77; नवघनवलयैरिवाञ्जनाद्रिर्बहुलनिशीथ इवान्धकारपुञ्जैः। अधिवसति ··· तटमिममुल्बणवृक्षमृक्षराजः RāmC. 6. 61; कृतेऽञ्जनाद्रिं त्रेतायां नारायणगिरिं तथा SkandP. ii(1). 1. 60; गच्छानेतुं गुह्यकं त्वमञ्जनाद्रौ महाजनम् VāmaP. 65. 130; किमेष पुनरुद्भूतपक्षतया समुड्डीयान्तरिक्षशिरस्यारूढवानञ्जनाद्रिः UdaySuKa. 75. 10; बाणव्रणगलद्रक्तस्तस्येभः शत्रुमर्दनः। सधातुनिर्झरोद्गारमञ्जनाद्रिं व्यडम्बयत् KathāSaSāg. ix. 1. 169; तेऽपतन्निहता भुवि। अञ्जनाद्रिदृषत्खण्डा धातुस्यन्दोज्ज्वला इव RājTa.(Ka.) 4. 329; शक्रः ···। नामतो देवरमणेऽञ्जनाद्राववतीर्णवान् TriṣaS'aPuC. i. 2. 632; ii. 3. 721; ĪśānS'iPa. ii. 17. 81; हिरण्यशृङ्गोऽञ्जनाद्रिरित्याख्याः स्युर्महीधराः BhāvPra.(S'ā.) 277. 8 (9); EI. vi. 330. 1; ĀnandRa. 8. 0 (47)

**अञ्जनाद्रीयमाण** (añjanādrīya-māṇa) *adj.* resembling a mountain of collyrium उषसि विहितकृत्यः सोऽञ्जनाद्रीयमाणः सरितमुपजगाम स्नातुकामो दशास्यः Rāvaṇā. 9. 52.

**अञ्जनाधिका** (añjanādhikā) *f.* a kind of lizard (also called Hālinī or Añjanī etc.) स्यादञ्जनाधिका हालिन्यञ्जनिका हलाहलः AbhidhāCin. 1298; S'abdaRa.(Su.) 4. 334; KośaKaTa. 1. 4524.

**अञ्जनानन्दन** (añjanā-nandana) *m.* Hanumat (*lit.* son of Añjanā) इत्याकूतं तस्य भीमोहितस्य ज्ञात्वालापैरञ्जनानन्दनोऽसौ। इत्थंकारं पथ्यमर्थं जगाद RāghPāṇ.(Dha.) 11. 22; 16. 34.

**अञ्जनानन्दवर्धन** (añjanānanda-vardhana) *adj.* increasing the joy of Añjanā (i. e. the son of Añjanā) दिष्ट्या सोऽयं महाबाहुरञ्जनानन्दवर्धनः UttaRāC. i. 32 = SaraKaṇṭhā. 694. 11.

**अञ्जनानुगमन** (añjanānugamana) *n.* entering (i. e. applying) of the ointment ततोऽञ्जनानुगमनायानुन्मीलयन् शनैरन्तश्चक्षुः संचारयेत् AṣṭāSaṁ. i. 165. 5 (1. 32)

**अञ्जनानुपलब्धि** (añjanānupalabdhi) *f.* non-apprehension of the collyrium (in one's own eye) सामीप्याद्यथा चक्षुषोऽञ्जनानुपलब्धिः Sāṁkhya-KāBh. 6. 19 (*on* 7)

**अञ्जनान्त** (añjanānta) *m.* [Loc.] at the end of the application of collyrium or unguent प्रतिमर्शश्चतुर्दशसु कालेषूपादेयः।··· मूत्रोच्चारकवलाञ्जनान्ते SiddhYo. 78. 10 (6)

**अञ्जनान्तर** (añjanāntara) *n.* another anointing अञ्जनकालेऽस्योपादानात्तदपवर्गे चापवर्गादञ्जनान्तरेऽन्यशकलोपादानम् S'āstrDī. 820. 11 (*on* xi. 3. 5)

**अञ्जनान्तर्हित** (añjanāntarhita) *adj.* invisible with the help of (magical) collyrium अञ्जनान्तर्हितो भूत्वा गुणशर्मा ततो ययौ KathāSaSāg. viii. 6. 81.

**अञ्जनान्वय** (añjanānvaya) *m.* name of a particular type of elephant believed to be descended from Añjana (the mystical elephant guardian (*diggaja*) of the southwest or west) रौद्रो लघुशिरा ह्रस्वश्वेतबिन्दुसमन्वितः। पाटलापुष्पनयनः स भवेदञ्जनान्वयः KalpaK. 109. 188.

**अञ्जनान्वयसम्भव** (añjanānvaya-sambhava) *adj.* born in the line of Añjana, descendent Añjana, (a particular tpye of elephant) स्निग्धवालधिदन्तो यश्वेतोहरकरान्वितः। उन्नतस्थूलजघनः सोऽञ्जनान्वयसम्भवः Mānaso. ii. 3. 279.

**अञ्जनान्वितलोचना** (añjanānvita-locanā) *adj.* (*f.*) with eyes having collyrium अञ्जनान्वितलोचनाम् ··· ध्यायेत्तां विजयाम् KālīViT. 18. 16.

**अञ्जनापति** (añjanā-pati) *m.* husband of Añjanā वायुम् ··· पूजयेदञ्जनापतिम् NāraS. 33. 74.

**अञ्जनाभ** (añjanābha) *adj.* (dark-) coloured like collyrium, of the colour of collyrium लोहितैरञ्जनाभैश्च वैडूर्यसदृशैरपि (पुष्पैः) MahāBhā. iii. 155. 61; ज्ञात्वा तान्यञ्जनाभानि सूक्ष्मचूर्णानि कारयेत् CaraS. vi. 1. (3). 17 (1941 Ed.); vi. 4. 12 (1941 Ed.); BṛSaṁ. 54. 110; अञ्जनाभं महाकायं दशम्यां यममर्चयेत् ParaS. 13. 50; अपरेऽञ्जनाभैः···केचिद्विचेलुः···वक्त्रैः प्लवगपतयः RāmC. 25. 16; RugVi. 9. 6; नमः ··· कवचायाञ्जनाभाय LiṅgaP. ii. 21. 13; DevīBhāP. xii. 2. 7; अञ्जनाभं तथाकाशम् LakṣmīT. 35. 41 = 54. 14; साष्टत्रिंशत्कलामूर्तमञ्जनाभं चतुर्मुखम्···ध्यात्वा ĪśānS'iPa. i. 30. 24; ii. 12. 13; अङ्गुष्ठमात्रं पुरुषं भजन्ते प्रफुल्लनेत्रोत्पलमञ्जनाभम् PañcaRā.(Nā.) v. 11. 26; प्रावृषेण्याः प्रियतमदिवसाः ··· अञ्जनाभमहावारिवाहौघनिचिताम्बराः VidaMuMa. 3. 3(1); S'ārṅgaPa. 3635; सोल्लासं मयि कृतनेत्रपद्मपातं लोकेऽहं कमपि किशोरमञ्जनो(? ना)भम् GopāKe-